# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम्** – ५ **गुणाः** - ७०

**विषयः** - स्वामिनारायणवेदान्तः (जे.) **कोड** – **CC 1.1.1. (NEW)** **समयः** - ०२ तः ०५

**दिनाङ्कः** - १९/१२/२०१८ **सन्दर्भग्रन्थः** – यतीन्द्रमतदीपिका

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ कयोश्चित् द्वयोः ससन्दर्भव्याख्या कार्या।** ५x२=१०

(१) लक्षणस्य त्रीणि दूषणानि सन्ति– अव्याप्तिरतिव्याप्तिरसम्भवश्चेति। लक्ष्यैकदेशे लक्षणस्यावर्तनमव्याप्तिः। लक्ष्यादन्यत्र वर्तमानत्वमतिव्याप्तिः। लक्ष्ये क्वाप्यवर्तनमसम्भवः।

(२) अथानुमानं निरूप्यते। व्याप्यस्य व्याप्यत्वानुसन्धानात् व्यापकविशेषप्रमितिरनुमितिः। तत्करणमनुमानम्। व्याप्यस्य-धूमस्य, अग्निव्याप्यत्वानुसन्धानात् व्यापकविशेषप्रमितिर्वह्निप्रमितिः।

(३) तदेतदनुमानं स्वार्थं परार्थं चेति द्विधा विभज्य केचिदाहुः। सर्वेषामेवानुमानानां स्वप्रतिसन्धानादिबलेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति स्वार्थानुमानमेवेत्यपरे।

**प्रश्नः – २ कस्यचिद् एकस्य प्रश्नस्योत्तरं देयम्** १०x१=१०

(१) यथाग्रन्थं स्मृतिस्वरूपं वर्णयत

(२) ग्रन्थोक्तदिशा यथार्थख्यातेः समर्थनं कुरुत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ कयोश्चित् द्वयोः ससन्दर्भव्याख्या कार्या।** ५x२=१०

१. वेदाङ्गानि।

२. प्रकृतिनिरूपणम्।

३. पञ्चभूतानां निरूपणम्।

**प्रश्नः – ४ कस्यचिद् एकस्य प्रश्नस्योत्तरं देयम्** १०x१=१०

(१) ग्रन्थोक्तदिशा शब्दप्रमाणं निरूपयत।

(२) ग्रन्थोक्तदिशा पञ्चीकरणप्रक्रियां प्रतिपादयत।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ कयोश्चित् द्वयो: ससन्दर्भ व्याख्या कार्या।** ५x२=१०

(१) कालनिरूपणम्।

(२) नित्यविभूते: भोग्यत्वनिरूपणम्।

(३) ब्रह्मणोऽह्नो वर्णनम्।

**प्रश्नः – ६ कस्यचिद् एकस्य प्रश्नस्योत्तरं लेख्यम्** १०x१=१०

(१) भगवतो दिव्यमङ्गलविग्रहस्य सर्वाश्रयत्वं प्रतिपादयत।

(२) यथाग्रन्थं नित्यविभूते: भोग्यत्वं निरूपयत।

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ अधोनोर्दिष्टेशु दशप्रश्नानामुत्तराणि लिखत।** १x१०=१०

(१) अजडं कतिविधम्?

(२) लक्षणस्य कति दूषणानि?

(३) का नाम प्रमा ?

(४) व्याप्यं कतिविधम्?

(५) वेदस्य उत्तरकाण्डं किम्?

(६) कति ज्ञानेन्द्रियाणि ?

(७) कतिविधम् इन्द्रियम्?

(८) किन्नाम इन्द्रियम् ?

(९) कति तन्मात्राणि ?

(१०) शरीरं कतिविधम्?

(११) ब्रह्मणोऽह्नि कति मनव: भवन्ति ?

(१२) अजडत्वं नाम किम्?

(१३) आप्तवाक्यं किम्?

(१४) यतीन्द्रमतदीपिकाया: कर्ता क: ?

(१५) ग्रन्थेऽस्मिन् कति अवतारा: ?

*****************